0755CH12

## एकादशः पाठः

# विद्याधनम्



न चौरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ।। 1 ।।

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ।। 2 ।।

केयूराः न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ।। 3 ।।

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयः
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु।। 4 ।।

# शब्दार्थाः


| | | | |
|---|---|---|---|
| **चौरहार्यम्** | – | चोरों के द्वारा चुराने योग्य | to be stolen by a thief |
| **राजहार्यम्** | – | राजा के द्वारा छीनने योग्य | to be attacked by a king |
| **भ्रातृभाज्यम्** | – | भाइयों के द्वारा बाँटने योग्य | to be divided among brothers |
| **भारकारि** | – | भार बढ़ाने वाली | burden |
| **प्रच्छन्नगुप्तम्** | – | अत्यन्त गुप्त | hidden |
| **भोगकरी** | – | भोग का साधन उपलब्ध कराने वाली | giving objects of pleasure |
| **परा** | – | सबसे बड़ी | the greatest |
| **राजसु** | – | राजाओं में | among kings |
| **केयूराः** | – | बाजूबन्द | bracelets |
| **चन्द्रोज्ज्वला** (चन्द्र+उज्ज्वला) | – | चन्द्रमा के समान चमकदार | as bright as the moon |
| **विलेपनम्** | – | शरीर पर लेप करने योग्य सुगन्धित-द्रव्य (चन्दन, केसर आदि) | anointing |
| **नालङ्कृता** (न+अलङ्कृता) | – | नहीं सजाया हुआ | undecorated |
| **मूर्धजाः** | – | वेणी, चोटी | plait (hair) |
| **वाण्येका** (वाणी+एका) | – | एकमात्र वाणी | speech alone |
| **समलङ्करोति** | – | अच्छी तरह सुशोभित करती है | decorates |
| **संस्कृता** | – | संस्कारयुक्त (परिष्कृत) | well cultured |
| **धार्यते** | – | धारण की जाती है | is borne |
| **क्षीयन्तेऽखिलभूषणानि** (क्षीयन्ते+अखिलभूषणानि | – | सम्पूर्ण आभूषण नष्ट हो जाते हैं | all ornaments perish |



Reprint 2024-25

| | | |
|---|---|---|
| भाग्यक्षये | – अच्छे दिन बीत जाने पर | when good days end |
| आश्रयः | – सहारा | helper |
| कामदुघा | – इच्छानुसर फल देने वाली | yielding all desired objects |
| सत्कारायतनम् | – सम्मान का केन्द्र या समूह | storehouse of respects |
| रत्नैर्विना | – रत्नों से रहित | without jewells |
| विद्याधिकारम् | – विद्या पर अधिकार | mastery over learning |
| तस्मादन्यमुपेक्ष्य (तस्मात्+अन्यम्+उपेक्ष्य) | – अतः दूसरे सबको छोड़कर | therefore giving up others |






1. **उपयुक्तकथनानां समक्षम् 'आम्', अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-**

(क) विद्या राजसु पूज्यते। ☐

(ख) वाग्भूषणं भूषणं न। ☐

(ग) विद्याधनं सर्वधनेषु प्रधानम्। ☐

(घ) विदेशगमने विद्या बन्धुजनः न भवति। ☐

(ङ) सर्वं विहाय विद्याधिकारं कुरु। ☐

2. **अधोलिखितानां पदानां लिङ्गं, विभक्तिं वचनञ्च लिखत-**

| पदानि | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|
| नरस्य | ............... | ............... | ............... |

Reprint 2024-25

| | | | |
|---|---|---|---|
| गुरूणाम् | ............... | ............... | ............... |
| केयूराः | ............... | ............... | ............... |
| कीर्तिम् | ............... | ............... | ............... |
| भूषणानि | ............... | ............... | ............... |

## 3. श्लोकांशान् योजयत-

| क | ख |
|---|---|
| विद्या राजसु पूज्यते न हि धनम् | हारा न चन्द्रोज्ज्वलाः। |
| केयूराः न विभूषयन्ति पुरुषम् | न भ्रातृभाज्यं न च भारकारि। |
| न चौरहार्यं न च राजहार्यम् | या संस्कृता धार्यते। |
| सत्कारायतनं कुलस्य महिमा | विद्या-विहीनः पशुः। |
| वाण्येका समलङ्करोति पुरुषम् | रत्नैर्विना भूषणम्। |

## 4. एकपदेन प्रश्नानाम् उत्तराणि लिखत-

(क) कः पशुः?

(ख) का भोगकरी?

(ग) के पुरुषं न विभूषयन्ति?

(घ) का एका पुरुषं समलङ्करोति?

(ङ) कानि क्षीयन्ते?

## 5. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) विद्याविहीनः <u>नरः</u> पशुः अस्ति।

(ख) <u>विद्या</u> राजसु पूज्यते।



Reprint 2024-25

(ग) चन्द्रोज्ज्वला: हारा: पुरुषं न अलङ्कुर्वन्ति।

(घ) पिता हिते नियुङ्क्ते।

(ङ) विद्याधनं सर्वप्रधानं धनमस्ति।

(च) विद्या दिक्षु कीर्तिं तनोति।

**6. पूर्णवाक्येन प्रश्नानाम् उत्तराणि लिखत-**

(क) गुरूणां गुरुः का अस्ति?

(ख) कीदृशी वाणी पुरुषं समलङ्करोति?

(ग) व्यये कृते किं वर्धते?

(घ) भाग्यक्षये आश्रयः कः?

**7. मञ्जूषातः पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गपदानि चित्वा लिखत-**

विद्या धनम् संस्कृता सततम् कुसुमम् मूर्धजाः पशुः गुरुः रतिः

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| यथा- | हाराः | अलङ्कृता | भूषणम् |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |
| | .................. | .................. | .................. |



Reprint 2024-25